2282
अमरकोशः
अमरसिंहविरचितः
९५ / २६(अ)

नद्धनं वीतंसस्तूपकरणं बंधने मृगपक्षिणां उन्माथः कूटयंत्रं स्याद्वागुरा मृगबंधिनी शुल्वं वरा
टकं स्त्री तु रज्जुस्त्रिषु वटो गुणः उद्घाटनं घटीयंत्रं सलिलोद्वहनं प्रहे पुंसि वेमा वायदंडः सूत्रा
णि नरि तंतवः वाणिर्व्यूतिः स्त्रियौ तुल्ये पुस्तं लेप्यादिकर्मणि पांचालिका पुत्रिका स्याद्वस्त्रदंता
दिभिः कृता [illegible] पिटकः पेटकः पेटा मंजूषाथ विहंगिका भारयष्टिस्तदालम्बिशिक्यं काचोथ
पादुका पादूरुपानत्स्त्री सैवानुपदीना पदायता नद्ध्री वध्री वरत्रा स्यादश्वादेस्ताडनी कशा चांडालि श्री
कातु कुंडोलवीणा चांडालवल्लकी नाराची स्यादेषणिका शाणस्तु निकषः कषः व्रश्चनः पत्र
परशुरीषिका तूलिका समे तैजसावर्त्तिनी मूषा भस्त्रा चर्म्मप्रसेविका आस्फोटनी वेधनिका

अमर कृपाणीकर्त्तरीसमे वृक्षादनोवृक्षभेदीटंकःपाषाणदारणः क्रकचोऽस्त्रीकरपत्रमाराचर्म्मप्र रम
भेदिका सूर्म्मीस्थूणायःप्रतिमाशिल्पंकर्मकलादिकं प्रतिमानंप्रतिबिम्बंप्रतिमाप्रतियातना
७१ प्रतिछायाप्रतिकृतिरर्चाप्रतिनिधिरूपमोपमानंस्यात् वाच्यलिंगाःसमस्तुल्यःसदृक्षः
सदृशःसदृक् साधारणःसमानश्चस्युरुत्तरपदेत्वमी निभसंकाशनीकाशप्रतीकाशोपमा
दयः कर्मण्यानुविधाभृत्याभृतयोभर्मवेतनं भरण्यंभरणंमूल्यंनिर्वेशःपणइत्यपि सुराह
लिप्रियाहालापरिस्रुद्वरुणात्मजा गंधोत्तमाप्रसन्नेराकादंबर्य्यःपरिस्रुता मदिराकश्यमद्ये
चाप्यवदंशस्तुभक्षणं शुंडापानंमदस्थानंमधुवारामधुक्रमाः मध्वासवोमाधवकोमधुमाध्वीकम ७१

द्वयोः मैरेयमासवः सिंधुर्मेदको जगलः समौ संध्यानं स्यादभिषवः किंन्वं पुंसि तु नग्नहूः का
रोत्तमः सुरामंडः आपानं पानगोष्ठिका चषकोस्त्री पानपात्रं सरकोप्यनुतर्षणं धूर्तोक्षदे
वी कितवोक्षधूर्तो द्यूतकृत्समाः स्युर्लग्नकाः प्रतिभुवः सभिका द्यूतकारकाः द्यूतोस्त्रियामक्ष
वती कैतवं पण इत्यपि पणोक्षेषु ग्लहोक्षास्तु देवनाः पाशकाश्च ते परिणायस्तु शारीणां सम
तान्नयनेस्त्रियां अष्टापदं शारिफलं प्राणिद्यूतं समाह्वयः उक्ता भूरिप्रयोगत्वादेकस्मिन्ये त्र
यौगिकाः तद्धर्म्यादन्यतो वृत्तावूह्या लिंगांतरेपि ते इति शूद्रवर्गः इत्यमरसिंहकृतौ नामलिं
गानुशासने भूमिकांडो द्वितीयोयं सांगएव समर्थितः द्वितीयो भूकांडः समाप्तः ॥ ः द्दिं ः २॥

अमर विशेष्यनिघ्नैः संकीर्णैर्नानार्थैरव्ययैरपि संगादिसंग्रहैवर्गादिसंग्रहैर्वर्गः समान्येवर्गसंश्रयाः १ रम
७२ स्त्रीदाराद्यैर्यद्विशेष्यं यादृशैः प्रस्तुतं पदैः गुणद्रव्यक्रियाशब्दास्तथास्युस्तस्यभेदकाः २ सुकृ
ती पुण्यवान्धन्यो महेच्छस्तु महाशयः हृदयालुः सुहृदयो महोत्साहो महोद्यमः ३ प्रवीरो निपुणा
भिज्ञविज्ञनिष्णातशिक्षिताः वैज्ञानिकः कृतमुखः कृती कुशल इत्यपि ४ पूज्यः प्रतीक्ष्यः शांप्रती
क्ष्यः शांशयिकः शंशयापन्नमानसः दक्षिणीयो दक्षिणार्हस्तत्र दक्षिण्य इत्यपि ५ स्युर्वदान्यस्थू
लक्ष्यदानशौण्डा बहुप्रदे जैवातृकः स्यादायुष्मानंतर्वाणिस्तु शास्त्रवित् ६ परीक्षकः कारणिको
वरदस्तु समर्द्धकः हर्षमाणो विकुर्वाणः प्रमना हृष्टमानसः ७ दुर्मना विमना अन्तर्मनास्यादुत्क ७२

उन्मनाः दक्षिणेशरलोदारौ सुकलो दातृभोक्तरि ८ तत्परे प्रसितासक्ताविष्टार्थोद्युक्तउत्सुकः
प्रतीतेप्रथितख्यातविश्रुताः ९ गुणैः प्रतीते तु कृतलक्षणाहतलक्षणौ इभ्य आढ्यो धनी
स्वामी त्वीश्वरः पतिरीशिता १० अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः अधिकर्द्धिः समृद्धः स्या
त्कुटुंबव्यापृतस्तु यः ११ स्यादभ्यागारिकस्तस्मिन्नुपाधिश्च पुमानयम् वरांगरूपोपेतो यः सिंहसं
हननो हि सः १२ निर्वार्य्यः कार्य्यकर्त्ता यः संपन्नः सत्वसंपदा अवाचि मूको ऽथ मनोजवसः पितृस
न्निभः १३ सत्कृत्यालंकृतां कन्यां यो ददाति स कुकुदः लक्ष्मीवान्लक्ष्मणः श्रीलः श्रीमान् स्निग्धस्तु व
त्सलः १४ स्याद्दयालुः कारुणिकः कृपालुः सूरतः समाः स्वतंत्रोपावृतः स्वैरी स्वछंदो निरवग्रहः १५ पर

अ०को० तंत्रः पराधीनः परवान्नाथवानपि अधिनोनिघ्न आत्तोऽस्वछंदो गृह्यकोप्यसौ १६ खलपूः स्याद्ब राम
हुकरो दीर्घसूत्रश्चिरक्रियः जल्मोऽसमीक्ष्यकारी स्यात्कुंठो मन्दः क्रियासु यः १७ कर्मक्षमोलं
७३ कर्मीणः क्रियावान्कर्मसूद्यतः सकार्मः कर्मशीलो यः कर्मशूरस्तु कर्मठः १८ कर्मण्यभुक्कर्मकरः
कर्मकारस्तु तत्क्रियः अपस्नातो मृतस्नातः आमीषाशी तु शष्कुलुः १९ बुभुक्षितः स्यात्क्षुधितो जिघ
त्सुरशनायितः परान्नः परपिंडादो भक्षको घस्मरो परः २० आद्यूनः स्यादौदरिको विजिगीषाविव
र्जिते उभौ त्वात्मंभरिः कुक्षिंभरिः स्वोदरपूरके २१ सर्वान्नीनस्तु सर्वान्नभोजी गृध्नुस्तु गर्धनः लुब्धो 73
भिलाषुकस्तृष्णक्समौ लोलुपलोलुभौ २२ सोन्मादस्तून्मदिष्णुः स्यादविनीतः समुद्धतः मत्ते शौं

डोत्कटस्तौ वाः कामिकेकमनानुकः २५ कंम्रः कामयितीभीकः कमनः कामनोभिकः वेश्यापतिर्भु
जंगस्यात्रिवगिः पल्लविकोविटः छेकोविदग्धे व्यसनेपरिभद्गउवल्मवे विधेयोवचनग्राहि
वचनेस्थितआश्रयः वश्यः प्रणेयोनिभृतविनितप्रश्रिताः समाः धृष्टेधृष्णुवियातश्चप्रगल्भः
प्रतिभान्विते २५ स्यादधृष्टेतुशालीनोविलक्षोविस्मयान्वितेः अधीरेकातरस्त्रस्तभीरुस्तेभीरु
भीलुकाः २६ आशंसुराशंसितरिगृहयालुर्ग्रहीतरि श्रद्धालुःश्रद्धयायुक्तःपतयालुस्तुपात
के २७ लज्जाशीलोपत्रपिष्णुर्वंदारुरभिवादके शरारुर्घातुकोहिंस्रः स्याद्वर्धिष्णुर्वर्धनः २८
उत्पतिष्णुस्तूत्पतितालंकरिष्णुस्तुमंडितः भूष्णुर्भविष्णुर्भविता वर्तिष्णुर्वर्तनःसमौ निराकरि

अमर स्नुरिष्णुः स्यात्सांद्रः स्निग्धः स्तुमेदुरः ज्ञाता तु विदुरो विंदुर्विकासि तु विकस्वरः ३० विसृत्व रम
रो विसृमरो प्रसारी च विसारिणि सहिष्णुः सहनः क्षंता तितिक्षुः क्षमिता क्षमि ३१ क्रोधनोम
७४ र्षणः कोपि चंडः स्त्वत्यंतकोपनः जागरूको जागरिता घूर्णितः प्रचलायितः ३२ स्वप्नक्शयालुर्नि
द्रालुर्निद्राणशयितौ समौ पराङ्मुखः पराचीनः स्यादवाङप्यधोमुखः ३३ देवानंचति देवद्र्यङ्
विश्वद्र्यङ् विश्वगंचति यः सहांचति सध्र्यङ् स तिर्यङ् यस्तिरोंचति ३४ वदोवदावदोवक्ता वागीशो
वाक्पतिः समौ वाचोयुक्तपटुर्वाग्मी वावदूकोऽतिवक्तरि ३५ स्याज्जल्पाकस्तु वाचालो वाचाटो बहु
गर्ह्यवाक् दुर्मुखे मुखराबद्धमुखौ शकलस्त्वप्रियंवदे ३६ लोहलः स्यादस्फुटवाक् गर्ह्यवादी तु कद् १४

द्रुदः समौ कुवादकुचरौ स्स्यादसौम्यस्वरेस्वरः रवणः शब्दनो नांदीवादी नांदीकरः समौ ज
डोज्ञः एडमुकस्तु वक्तुं श्रोतुमशिक्षिते तुस्नीशीलःस्तु तुस्नीको नग्नोवासः दिगंवरः निष्का
सितोवकृष्टः स्यात अपध्वस्तुधिकृतः ३९ आत्तवर्गोभिभूतस्यादापितः साधितः समौ अधि
क्षिप्तः प्रतिक्षिप्तो वद्धे कीलितसंयतौ ४० आपन्न स्त्वापत्प्राप्तः स्यात्कांदिशीको भयद्रुतः आक्षा
रितः क्षारितोभिशस्ते संकुसिकोस्थिरे ४१ व्यसनार्त्तौपरक्तौ द्वौ विहस्तव्याकुलौ समौ विक्लवो
विक्लवः स्यात्तु विवशोरिष्टदुष्टधीः ४२ कश्यः कशार्हे सन्नद्धे त्वाततायी वधोद्यते द्वेष्ये त्वक्षि
गतोवध्यः शीर्षघेद्यइमौसमौ ४३ विष्योविषेणयो वध्यो मुशल्यो मुशलेनयः शिश्विदानो

अमर कृष्कक मोचपलःश्चिकुरःसमौ ४४ दोषैकदृक्पुरोभागी निकृतःस्त्वनृजुःशठः कर्णेजपःसूचक राम
७५ स्यात्पिशुनोदुर्जनःखलः ४५ नृशंसोघातुकःक्रूरःपापोधूर्त्तस्तुवंचकः अज्ञेमूढयथाजात
मूर्खवैधेयबालिशाः ४६ कदर्य्येकृपणःक्षुद्रकिंपचानमितंपच निस्वस्तुदुर्विधोदीनोदरि
द्रोदुर्गतोपिसः ४७ वनीयकोयाचनकोमार्गणोयाचकार्थिनो अहंकारान्वितोहंयुःशुभंयुस्तु
शुभान्वितः ४८ दिव्योपपादुकादेवान्नगवाद्याजरायुजाः स्वेदजाःकृमिदंशाद्याःपक्षिसर्पाद
योऽंडजाः ४९ उद्भिदस्तरुगुल्मा द्याउद्भिउद्भिद्यद्भिदं सुंदरंरुचिरंचारुसुषमंसाधुशोभनं ५०
कांतंमनोरमंरुच्यंमनोज्ञंमंजुमंजुलं तदासेचनकंतृप्तेर्नास्त्यंतोयस्यदर्शनात् ५१ अभीष्टेभी ७५

प्सितं हृद्यं दयितं वल्लभं प्रियं निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः ५२ कुपूयकुत्सितावं
द्यखेटगर्ह्याणकाः समाः मलीमसं तु मलिनं कच्चरं मलदूषितं ५३ पूतं पवित्रं मेध्यं च वीध्रं तु
विमलात्मकं निर्णिक्तं शोधितं मृष्टं निःशोध्यमनवस्करं ५४ असारं फल्गु शून्यं च वशिकं तुच्छरि
क्तके क्लीबे प्रधानं प्रमुखप्रवेकानुत्तमोत्तमाः मुख्यवर्यवरेण्याश्च प्रवर्होनवरार्ध्यवत् ५५
र्ध्याग्रप्राग्रहरप्राग्र्याग्र्याग्रीयमग्रियं श्रेयान् श्रेष्ठः पुष्कलः स्यात्सत्तमः श्चातिशोभने
स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुंजराः सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः अप्रा
ग्र्यं द्वयहीने द्वे अप्रधानोपसर्जने विशंकटं पृथु बृहद्विशालं पृथुलं महत् वड्रोरु विपुलं

अमर पीनंपीव्रीतुस्थूलपीवरे स्तोकाल्पक्षुल्लकाः सूक्ष्मंश्लक्ष्णंदभ्रंकृशंतनु स्त्रियांमात्रात्रुटीपुंसि राम
लवलेशकणाणवः अत्यल्पेऽल्पिष्ठमल्पीयकनीयोणीयइत्यपि प्रभूतंप्रचुरंप्राज्यमदभ्रंब
७६ हुलंबहु पुरुहूःपुरुभूयिष्ठंस्फारंभूयश्चभूरिच परःशताद्यास्तेयेषापरासंख्याशताधिका
त् गणनीयेतुगणेयंसंख्यातेगणितमथसमंसर्वं ॥ विश्वमशेषंकृत्स्नंसमस्तनिखिला
खिलानिनिःशेषं ॥ समग्रंसकलंपूर्णमखंडंस्यादनूनके घनंनिरंतरंसांद्रंपेलवंविरलंत
नु समीपेनिकटासन्नसन्निकृष्टसनीडवत् संदेशाभ्याससविधसमर्यादसवेशवत् उपकं
ठाभ्यप्यभितोव्ययंससक्तेत्वव्यवहितमपदांतरइत्यपि नेदिष्ठमंतिकतमंस्यादुरंविप्रकृष्टकम् ७६

दवीयश्चदविष्ठंचसुदूरेदीर्घमायतं वर्त्तुलंनिस्तलंवृत्तंवंधुरंत्तून्नतानतं उच्चप्रांशून्नतोद
ग्रोछ्रितास्तुंगेचवामने न्यङनीचह्रस्वखर्वास्युर्वाग्रेवनतानतं अरालंवृजिनंजिह्मऊर्मि
ममत्कुंचितंनतं आविद्धंकुटिलंभुग्नंवेल्लितंवक्रमित्यपि ऋजावजिह्मप्रगुणौव्यस्तेत्वप्रगुणा
कुले शाश्वतस्तुध्रुवोनित्यसदातनसनातनाः स्थास्नुस्थिरतरस्थेयानेकरूपतयातुयः का
लव्यापीसकूटस्थःस्थावरोजंगमेतरः चरिष्णुजंगमचरंत्रसमिंगंचराचरम् चलनंकंप
नंकंपोचलंलोलंचलाचलं चंचलंतरलंचैवपारिप्लवपरिप्लवे अतिरिक्तःसमधिकोदृढसंधि
स्तुसंहतः कर्कशंकठिनंक्रूरंकठोरंनिष्ठुरंदृढं राजठंमूर्त्तिमन्मूर्त्तंप्रवृद्धंप्रौढमेधितं पुरा

अमर णं प्रतनं प्रत्नपुरातनचिरंतनाः प्रत्यग्रोभिनवोनव्योनवीनोनूतनोनवः नुनश्च कुसुमा। राम
रंतुकोमलंमृदुलंमृदु अन्वगन्वक्षमनुगोनुपदंक्लीबमव्ययं प्रत्यक्षंस्यादैंद्रियकमप्रत्यक्ष
११ मतींद्रियम् एकतानोनन्यवृत्तिरेकाग्रैकायनावपि अप्येकसर्ग एकाग्र्योःप्येकायनगतो
पिसः पुंस्यादिःपूर्वपौरस्त्यप्रथमाद्याअथास्त्रियाम् अंतोजघन्यंचरममंत्यपाश्चात्यपश्चि
मे मोघंनिरर्थकंस्पष्टंस्फुटंप्रव्यक्तमुल्बणं साधारणंसामान्यमेकाकीत्वेक एककः भि
न्नार्थकाअन्यतर एकस्त्वन्येतरावपि उच्चावचंनैकभेदमुच्चंडमविलंबितं अरुंतुदस्तुमर्मस्पृग
बाधंतुनिर्गलं प्रसव्यंप्रतिकूलंस्यादपसव्यमपष्ठुच वामंशरीरेसव्यंस्यादपसव्यंतुदक्षिणे ११

अमर

संकटंनातिसंबाधः कलिलंगहनंसमे संकीर्णेसंकुलाकीर्णेमुंडितंपरिवापितं ग्रथितंगुंफि
तंलुब्धंविसृतंविस्तृतंततं अंतर्गतंविस्मृतंस्यात्प्राप्तप्रणिहितेसमे वेल्लितंप्रेंखितंधूतंच
लिताकंपिताधुते नुन्ननुन्नास्तनिष्ठ्यूताविद्धक्षिप्तेरिताःसमाः परिक्षिप्तंतुनिवृतंमुषितंमुषि
७८ तार्थकं प्रवृद्धप्रसृतेन्यस्तनिसृष्टेगुणिताहते ८८ निदिग्धोपचितेगूढगुप्तेगुंठितरूषिते द्रुतावदी
र्णेउद्गूर्णोद्यतेकाचितशिक्यिते ८९ घ्राणघ्रातेदिग्धलिप्तौसमुदक्तोद्धृतेसमे वेष्टितंस्याद्वलयितंसं
वीतंरुद्धमावृतं ९० रुग्णंभुग्नेथनिशितक्ष्णुतशातानितेजिते स्याद्विनाशोन्मुखंपक्वंह्रीणह्रीतौतु ७८
लज्जिते (स्याद्विनाशोन्मुखंपक्वंह्रीणह्रीतौतुलज्जिते) ९१ वृत्तेतुवृत्तव्यावृत्तौसंयोजितउपाहितः प्रा

अमर० प्यंगमंगसमासाद्यस्यन्नंरीणंस्नुतंस्नुतं ८२ संगूढःस्यात्संकलितोऽवगीतःख्यातगर्हणो विविधःस्याद्बहुवि रम
धोनानारूपःपृथग्विधः ८३ अवरीणोधिक्कृतश्चाप्यवध्वस्तोऽवचूर्णितः अनायासकृतंफाण्टंस्वनि
७८ तंध्वनितंसमम ८४ बद्धेसंदानितंमूतमुद्दितंसंदितंसितं निष्पक्वंक्वथितंपाकेक्षीराज्यहविषांशृतं ८५ नि
र्वाणोमुनिवह्न्यादौनिर्वातस्तुगतेऽनिले पक्वंपरिणतेगूनंहन्नेमीढंतुमूत्रिते ८६ पुष्टेतुपुषितंसोढेक्षान्तमु
द्वान्तमुद्गते दांतस्तुदमितेशांतःशमितेप्रार्थितेर्दितः ८७ ज्ञप्तस्तुज्ञपितेछन्नश्छादितेपूजितेंचितः पूर्णस्तु
पूरितेक्लिष्टःक्लिशितेऽवसितेसितः ८८ प्रुष्टप्लुष्टोषितादग्धेतष्टत्वष्टौतनूकृते वेधितच्छिद्रितौविद्धे
विन्नवित्तौविचारिते ८९ निष्प्रभेविगतारोकौविलीनेविद्रुतद्रुतौ सिद्धेनिर्वृत्तनिष्पन्नौदारितेभिन्नभेदितौ ९० ७८

ऊतंस्यूतमुतंचेतित्रितयंतंतुसंतते स्यादर्हितेनमस्यितनमसितमपचायितार्चितापचितं १०१ वरिवसितेव
रिवस्यितमुपासितंचोपचरितंच संतापितसंतप्तौधूपितधूपायितौचदूनश्च १०२ हृष्टेमत्तस्तृप्तःप्रह्लन्नः
प्रमुदितःप्रीतः छिन्नंछातंलूनंकृत्तंदातंदितंछितंवृक्णं १०३ स्रस्तंध्वस्तंभ्रष्टंस्कन्नंपन्नंच्युतंगलितं ल
ब्धंप्राप्तंविन्नंभावितमासादितंचभूतंच १०४ अन्वेषितंगवेषितमन्विष्टंमार्गितंमृगितं आर्द्रंसार्द्रंक्लिन्नंतिमि
तंस्तिमितंसमुन्नमुत्तंच १०५ त्रातंत्राणंरक्षितमवितंगोपायितंचगुप्तंच अवगणितमवमतावज्ञातेवमा
नितंचपरिभूते १०६ त्यक्तंहीनंविधुतंसमुज्झितंधूतमुत्सृष्टे उक्तंभाषितमुदितंजल्पितमाख्यातमभिहितं
लपितं १७ बुद्धंबुधितंमनितंविदितंप्रतिपन्नमवसितावगते ऊरीकृतमुररीकृतमंगीकृतमाश्रुतंप्रतिज्ञातं १०८

अमर
७९

संगीर्णे विदित संश्रुत समाहितोपश्रुतोपगतं ईलित शस्त पणायित पनायित प्रणुत पणित पनितानि ९९
अपि गीर्ण वर्णिताभिष्टुतेडितानि स्तुतार्थानि भक्षित चर्वित लीढ प्रत्यवसित गिलित खादित प्सातं॥ ११०
अभ्यवहृतान्नजग्धग्रस्तग्लस्ताशितं भक्षे क्षेपिष्ठ क्षोदिष्ठ प्रेष्ठ वरिष्ठ स्थविष्ठ बंहिष्ठाः ११ क्षिप्र क्षुद्रा
भीप्सित पृथु पीवर बहुल प्रकर्षार्थाः साधिष्ठ द्राघिष्ठ स्फेष्ठ गरिष्ठ ह्रसिष्ठ वृन्दिष्ठाः ११२ बाढ व्यायत बहु
गुरु वामन वृन्दारकातिशये॥ ॥ इति विशेष्यनिघ्नवर्गः॥ ॥प्रकृतिप्रत्ययार्थाद्यैः संकीर्णे लिं
गमुन्नयेत् कर्म क्रिया तत्सातत्ये गम्ये स्युरपरस्पराः १ साकल्यासंगवचने पारायणपरायणे यदृच्छा
स्वैरिता हेतुशून्यास्त्वास्था विलक्षणम् २ शमथस्तु शमः शान्तिर्दान्तिस्तु दमथो दमः अवदानं कर्म वृत्तं काम्य

नम
७९

दानंप्रवारणम् ३ वशक्रियासंवननंमूलकर्मतुकार्मणं विधूननंविधुवनंतर्पणंप्रीणनावनं
४ पर्याप्तिःस्यात्परित्राणंहस्तधारणमित्यपि सेवनंसीवनंस्यूतिर्विदरःस्फुटनंभिदा ५ आक्रोश
नमभीषंगःसंवेदोवेदनाना संमूर्छनमभिव्याप्तिर्याञ्चाभिशस्तिर्याचनार्थना ६ वर्धनंछेदनेऽथद्वे
आनंदनसभाजने आप्रच्छन्नमथाम्नायःसंप्रदायःक्षयेक्षिया ७ ग्रहेग्राहोवशःकांतौरक्षणस्त्रा
णेरणःक्वणे व्यधोवेधपचापाकेहवोहूतौवरोवृतौ ८ ओषःप्लोषेनयोनायेज्यानिर्जीर्णौभ्र
मोभ्रमौ स्फातिर्वृद्धौप्रथाख्यातौस्पृष्टिःपृक्तौस्नवःस्रवे ९ एधासमृद्धौस्फुरणेस्फुरणाप्रमि
तौप्रमा प्रसूतिःप्रसवेश्च्योतेप्राघारःक्लमथःक्लमे १० उत्कर्षोऽतिशयेसंधिःश्लेषेविषयआश्र

अमर आश्रये क्षिपायां क्षेपणं गीर्णिर्गिरौ गुरणमुद्यमे ११ उन्नाय उन्नये श्रायः श्रयणे जयने जयः।
निगादो निगदे मादो मदे उद्वेग उद्भ्रमे १२ विमर्दनं परिमलेऽभ्युपपत्तिरनुग्रहः निग्रहस्तद्विरुद्धः स्या
दभियोगस्त्वभिग्रहः १३ मुष्टिबंधस्तु संग्राहो डिंबे डमरविप्लवौ बंधनं प्रसितिश्चारः स्पर्शः स्प्रष्टोपत
८० प्तरि १४ निकारो विप्रकारः स्यादाकारस्त्विंग इंगितं परिणामो विकारो द्वे समे विकृतिविक्रिये १५
अपहारस्त्वपचयः समाहारः समुच्चयः प्रत्याहार उपादानं विहारस्तु परिक्रमः १६ अभिहारो
ऽभिग्रहणं निर्हारोऽभ्यवकर्षणम् अनुहारोऽनुकारः स्यादर्थस्यापगमे व्ययः १७ प्रवाहस्तु प्रवृत्तिः राम
स्यात्प्रवहो गमनं बहिः वियामो वियमो यामो यमः संयामसंयमौ १८ हिंसाकर्माभिचारः स्याज्जा ८०

र्याजागरादयोः विघ्नोंतरायः प्रत्यूहः स्यादुपघ्नोंतिकाश्रये १९ निर्वेशउपभोगस्स्यात्परिसर्प्पः
परिक्रिया विधुरंतु प्रविश्लेषोऽभिप्रायश्छंदआशयः २० संक्षेपणं समसनं पर्यवस्था विरोधनं प
रिसर्या परीसारः स्यादास्या त्वासना स्थितिः २१ विस्तारो विग्रहो व्यासः सचशब्दस्तु विस्तरः संवाहनं
मर्दनं स्याद्विनाशः स्याददर्शनं २२ संस्तवः स्यात्परिचयः प्रसरस्तु विसर्पणं नीवाकस्तु प्रयामः स्या
त्संनिधिः संनिकर्षणं २३ लवोऽभिलावो लवने निष्पावः पवने पवः प्रस्तावः स्यादवसरस्त्रसरः सू
त्रवेष्टनं २४ प्रजनः स्यादुपसरः प्रश्रयप्रणयौ समौ धीशक्तिर्निष्क्रमोऽस्त्री तु संक्रमो दुर्गसंचरः २५
प्रत्युत्क्रमः प्रयोगार्थः प्रक्रमः स्यादुपक्रमः स्यादभ्यादानमुद्घात आरंभः संभ्रमस्त्वरा २६ प्रतिबंधः प्रति

मे
अमर० ष्टंभोऽवनायस्तु निपातनं उपलंभः स्त्वनुभवः समालंभो विलेपनं २७ विप्रलंभो विप्रयोगो विलंभस्त्व
तिसर्जनं विश्रावस्तु प्रतिख्यातिरवेक्षा प्रतिजागरः २८ निपाठनिपठौ पाठे तेमस्तेमौ समुंदने आदीन
८१ वास्रवौ क्लेशे लुके संगसंगमौ २९ संवीक्षणं विचयनं मार्गणं मृगणा मृगः परिरंभः परिष्वंगः संश्लेष
उपगूहनम् ३० निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणं प्रत्याख्यानं निरसनं प्रत्यादेशो निराकृतिः ३१
उपशायो विशायश्च पर्यायशयनार्थकौ अर्त्तनं च ऋतीया च हृणीया च घृणार्थकाः ३२ स्याद्व्यत्यासो वि
पर्यासो व्यत्ययश्च विपर्यये पर्ययोऽतिक्रमस्तस्मिन्नतिपात उपात्ययः ३३ प्रेषणं यत्समाहूय तत्र रम
स्यात्प्रतिशासनं सस्थावः क्रतुषु यामभुक्ति भूमिर्हि जन्मनां ३४ निघायतनस्य तेयत्र काष्ठे काष्ठं स उद्घनः ॥ ८१

स्तंबघ्नस्तु स्तंबघनः स्तंबो येन निहन्यते ३५ आविधो विध्यते येन तत्र विष्वक्समे निघः उत्कारश्च निकारश्च
द्वौ धान्योत्क्षेपणार्थकौ ३६ निगारोद्गारविक्षावोद्ग्राहास्तु गरणादिषु ३७ आरत्यवरतिविरतय उपरा
मेऽस्त्रियां तु निष्ठेवः निष्ठ्यूतिर्निष्ठेवनं निष्ठीवनमित्यभिन्नानि ३८ जवने जूतिः सातिस्त्ववसाने स्यादथ ज्वरे
जूर्तिः उदजस्तु पशुप्रेरणमकरणिरित्यादयः शापे ३९ गोत्रांतेभ्यस्तस्य वृंदमित्यौपगवकादिकं आपूपिकं शा
ष्कुलिकमेवमाद्यमचेतसां ४० माणवानां तु माणव्यं सहायानां सहायता हल्या हलानां ब्राह्मण्यवाडव्ये तु द्विजन्म
नां ४१ द्वे पर्शुकानां पृष्ठानां पार्श्वं पृष्ठ्यमनुक्रमात् खलानां खलिनी खल्याप्यथ मानुष्यकं नृणां ४२ ग्रामता
जनता धूम्या पाश्या गल्या पृथक् पृथक् अपि साहस्रकारीषवार्मणाऽथर्वणादिकं ४३ इति संकीर्णवर्गः ॥ ॥

अमर० नानार्थाः केपि कांतादिवर्गेष्वेवात्र कीर्त्तिताः भूरिप्रयोगा ये येषु पर्यायेष्वपि तेषु ते १ आकाशे त्रिदिवे नाको एम
लोकस्तु भुवने जने पद्ये यशसि च श्लोकः शरे खड्गे च सायकाः २ जंबुकौ क्रोष्टुवरुणौ पृथुकौ चिपिटार्भकौ
८२ आलोको दर्शनद्योतौ भेरीपटहमानकौ ३ उत्संगचिन्हयोरंकः कलंकोंऽकापवादयोः तक्षको नागव
र्द्धक्यो रर्कः स्फटिकसूर्ययोः ४ मारुते वेधसि ब्रध्ने पुंसि कः कं शिरोंबुनोः स्यात्पुलाकस्तुच्छधान्ये संक्षेपे भ
क्तसिक्थके ५ उलूके करिणः पुच्छमूलोपांते च पेचकः कमंडलौ च करकः सुगते च विनायकः ६ किष्कु
र्हस्ते वितस्तौ च शूककीटे च वृश्चिकः प्रतिकूले प्रतीकं त्रिष्वेकदेशे तु पुंस्ययं ७ स्याद्भूतिकं तु भूनिंबे कत्तृणे भू ८२

स्तृतोपि च ज्योत्स्निकायां च घोषे च कोशातक्यथ कट्फले ८ सिते च खदिरे सोमवल्कः स्यादथ सिल्हके
तिलकल्के च पिण्याको बाल्हीकं रामठेपि च ९ महेन्द्रगुग्गुलूलूकव्यालग्राहिषु कौशिकः रुक्तापसंका
स्वातंकः स्वल्पेपि क्षुल्लकस्त्रिषु १० जैवातृकः शशांकेपि खुरेप्यश्वस्य वर्त्तकः व्याघ्रेपि पुंडरीको ना
यवान्यामपि दीपकः ११ शालावृकाः कपिक्रोष्टुश्वानः स्वर्णेपि गैरिकं पीडार्थेऽपि व्यलीकं स्यादलीकं
त्वप्रियेऽनृते १२ शीलान्वयावनूके द्वे शल्के शकलवल्कले साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले १३
दीनारेपि च निष्कोऽस्त्री कल्कोऽस्त्री शमलैनसोः दम्भेप्यथ पिनाकोऽस्त्री शूलशंकरधन्वनोः १४ धेनुका तु
करेण्वां च मेघजाले च कालिका कारिका यातनावृत्त्योः कर्णिका कर्णभूषणे १५ करिहस्तांगुलौ पद्म

बीजकोशस्त्रिपुष्करे वृंदारकौ रूपिमुख्यादेवेमुख्यान्यकेवलाः १६ स्याद्दांभिकः कौकुटिको यश्चादूरेरिते।
क्षणः ललाटिकः प्रभोर्भालदर्शी कार्याक्षमश्च यः १७ भूस्पृशि तंत्रवलयचक्रेषु पुष्करस्कोऽस्त्रियां सूच्यग्रे।
क्षुद्रशत्रौ च रोमहर्षे च कंटकः १ पाकौ पक्तिशिशू मध्यरत्ने नेतरि नायकः पर्यंकः स्यात्परिकरः स्याद्व्याघ्रेऽपि च
लुब्धकः २ आर्द्रीयामपि लुब्धकद्रयपि पाटः पेटकस्त्रिषु वृंदेऽपि गुरौ दंभेऽपि च दैशिकः खेटकौ ग्रामफलकौ
धीवरेऽपि च जालिकः ३ पुष्परेणौ च किंजल्कः शुल्कः स्त्रीस्त्रीधनेऽपि च स्यात्कल्लोलेऽप्युत्कलिका वार्द्धकं भा
वर्द्धयोः ४ करिण्यां चापि गणिका दारकौ बालभेदकौ अंधेऽप्यनेडमूकः स्यात्टंकौ दर्पाश्मदारणौ ५ ॥
इतिपंचदशपकाः ॥ ॥ इतिकांतवर्गः ॥ मयूखस्त्विट्करज्वालास्वलिबाणौशिलीमुखौ ५ ६

शंखोनिधौललाटास्थ्निकंबौनस्त्रींद्रियेपिखं १८ घृणिज्वालेअपिशिखे ॥खांताः॥ शैलवृक्षौनगावगौ आशुगौ
वायुविशिखौशरार्कविहगाःखगाः १९ पतंगौपक्षिसूर्य्यौचपूगःक्रमुकवृंदयोः पशवोपिमृगावेगःप्रवाहज
वयोरपि २० परागःकौसुमेरेणौस्नानीयादौरजस्यपि गजेपिनागमातंगावपांगस्तिलकेपिच २१ सर्गःस्व
भावनिर्मोक्षनिश्चयाध्यायसृष्टिषु योगःसंनहनोपायध्यानसंगतियुक्तिषु २२ भोगःसुखेस्त्र्यादिभृतावहेश्च
फणकाययोः चातकेहरिणेपुंसिसारंगःशबलेत्रिषु २३ कपौचप्लवगःशापेत्वभिषंगःपराभवे यानाद्यंगेयुगः
पुंसियुगंयुग्मेकृतादिषु २४ स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले लक्ष्यदृष्ट्यास्त्रियांपुंसिगौर्लिंगंचिह्न
शेफसोः २५ शृंगंप्राधान्यसान्वोश्चवरांगंमूर्द्धगुह्ययोः भगंश्रीकाममाहात्म्यवीर्य्यरत्नार्ककीर्त्तिषु २६ इति

अमर घांताः परिघः परिघातेऽस्त्रेप्योघो वृंदेंऽभसां रये मूल्ये पूजाविधावर्घो होदुःखव्यसनेष्वघं २७ त्रिष्विष्टेऽल्पे टम
लघुः ॥ इति घांताः काचाः शिक्यमृद्भेददृग्रुजः विपर्यासेविस्तरेचप्रपंचः पाक्येशुचिः २८ मास्यमात्येचात्युपधे
८४ पुंसिमेध्येसितेत्रिषु अभिष्वंगेस्पृहायांच गभस्तौच रुचिः स्त्रियां २९ इति चांताः प्रसन्नेभल्लुकेप्यच्छो गुच्छस्त
वकहारयोः परिधानांचलेकच्छोजलप्रांतेत्रिलिंगकः ९ इति छेपकरस्थांताः ॥ केजितास्तावहिभुजो दंतविप्रां
डजाद्विजाः अजाविष्णुहरच्छागा गोष्ठाध्वनिवहाव्रजाः ३० धर्मराजौजिनयमौकुंजोदंतेपिनस्त्रियाम् व
लजेक्षेत्रपूर्द्वारेवलजावल्गुदर्शना ३१ समेक्ष्मांशेरणेप्याजिः प्रजास्यात्संततौजने अब्जौशंखशशांकौचस्वके
नित्येनिजंत्रिषु ३२ इतिजांताः पुंस्यात्मनिप्रवीणेचक्षेत्रज्ञोवाच्यलिंगकः संज्ञास्याच्चेतनानामहस्ताद्यैश्चार्थसू ८५

वना ३५ इति जांताः काकेभगंडौ करटौ गजगंडकटौ कटौ शिपिविष्टस्तु खलतौ दुश्चर्मणि महेश्वरे ३६।
देवशिल्पिन्यपि त्वष्टा दिष्टं दैवेऽपि न द्वयोः रसे कटुः कटुकार्ये त्रिषु मत्सरतीक्ष्णयोः रिष्टं क्षेमाशुभाभावे
ष्वरिष्टे तु शुभाशुभे ३७ भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु ३८ इति गांताः परिघः परिघातेऽस्त्रे
मायानिश्चलयंत्रेषु कैतवानृतराशिषु अयोघने शैलशृंगे सीरांगे कूटमस्त्रियां ३९ सूक्ष्मैलायां त्रुटिः स्त्री स्या
त्काले ल्पे संशयेऽपि सा अत्युत्कर्षाश्रयः कोट्यो मूले लग्नकचे जटा ४० व्युष्टिः फले समृद्धौ च दृष्टिर्ज्ञानेऽ
क्ष्णि दर्शने इष्टिर्यागेच्छयोः सृष्टं निश्चितं बहुनि त्रिषु ४१ कष्टे तु कृच्छ्रगहने दक्षामंदागदेषु च पटू द्वौ
वाच्यलिंगौ च इति टांताः॥ नीलकंठः शिवोऽपि च ४२ पुंसि क्रोडे घंटां न जठरं कुसूलोऽन गृहं तथा निष्ठा निष्पत्ति

 नाशांताः काष्ठोत्कर्षे स्थितौ दिशि ४० त्रिषु ज्येष्ठोऽतिशस्तेपि कनिष्ठोऽतियुवाल्पयोः इति ठांताः दंडोस्त्री ल 
गुडेपि स्याद्गुडो गोलेक्षुपाकयोः ४१ सर्पमांसात्पशू व्याडौ गोभूवाचस्त्विडा इलाः क्ष्वेडा वंशशलाकापि नाडी
कालेपि षट्क्षणे ४२ कांडोस्त्री दंडबाणार्ववर्गावसरवारिषु स्याद्भांडमश्वाभरणेऽमत्रे मूलवणिग्धने ४३
 इति डांताः भृशप्रतिज्ञयोर्बाढं प्रगाढं भृशकृच्छ्रयोः शक्तस्थूलौ त्रिषु दृढौ व्यूढौ विन्यस्तसंहतौ ४४ इति ढां
ताः भ्रूणोऽर्भके स्त्रैणगर्भे बाणो बलिसुते शरे कणोऽतिसूक्ष्मे धान्यांशे संघाते प्रमथे गणाः ४५ पणो द्यूता
दिषूत्सृष्टे भृतौ मूल्ये धनेपि च मौर्व्यां द्रव्याश्रिते सत्वशौर्यसंध्यादिके गुणाः ४६ निर्व्यापारस्थितौ कालविशे
षोत्सवयोः क्षणः वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु वाऽक्षरे ४७ अरुणो भास्करेपि स्याद्वर्णभेदेपि च त्रि 

त्रिषु स्थाणुः शर्वो प्यथ द्रोणः काके प्याजौ रवे रणः ४८ ग्रामणीर्नापिते पुंसि श्रेष्ठे ग्रामाधिपे त्रिषु ऊर्णा
मेषादिलोम्नि स्यादावर्त्ते चांतरा भ्रुवोः ४९ हरिणी स्यान्मृगी हेमप्रतिमा हरिता च या त्रिषु पांडौ च हरिणः स्थू
णास्तंभे पि वेश्मनः ५० तृष्णे स्पृहापिपासे द्वे जुगुप्साकरुणे घृणे वणिक्पथे च विपणिः सुरा प्रत्यक् च वा
रुणी ५१ करेणुरिभ्यां स्त्री नेभे द्रविणं तु बलं धनं शरणं गृहरक्षित्रोः श्रीपर्णं कमलेपि च ५२ विषाभि
मरलोहेषु तीक्ष्णं क्लीबे खरे त्रिषु प्रमाणं हेतुमर्यादाशास्त्रेयत्ताप्रमातृषु ५३ करणं साधकतमं क्षे
त्रगात्रेंद्रियेष्वपि प्राण्युत्पादे संसरणमसंबाधचमूगतौ ५४ घंटापथे ऽथ वांतान्ने समुद्गिरणमुन्न
ये ऽतस्त्रिषु विषाणं स्यात्पशुशृंगेभदंतयोः ५५ प्रवणं क्रमनिम्नोर्व्यां प्रह्वे ना तु चतुष्पथे संकीर्णो नि

अमर चिताग्शुक्लाविरिरांशस्त्र्यमूषरं ५६ सेनौचवरत्मोवेणीनदीभेदेकचोच्चये इति तांताः देवसूर्यौ विव
स्वंतौ सरस्वंतौ नदार्णवौ पक्षितार्क्ष्यौ गरुत्मंतौ शकुंतौ भासपक्षिणौ ५७ अग्न्युत्पातो धूमकेतुर्जीमूतौ
२६ मेघपर्वतौ हस्तौ तु पाणिनक्षत्रे मरुतौ पवनामरौ ५८ यंता हस्तिपके सूते भर्त्ता धातरि पोष्टरि यानपा
त्रे शिशौ पोतः प्रेत प्राण्यंतरे मृते ५९ ग्रहभेदे ध्वजे केतुः पार्थिवे तनये सुतः स्थपतिः कारुभेदेपि भूभृद्भू
मिधरे नृपे ६० मूर्धाभिषिक्तो भूपेपि ऋतुः स्त्रीकुसुमेपि च विष्णावप्यजिताव्यक्तौ सूतस्त्वष्टरि सारथौ
६१ व्यक्तः प्राज्ञेपि दृष्टांतावुभौ शास्त्रनिदर्शने क्षत्ता स्यात्सारथौ द्वाःस्थे क्षत्रियायां च शूद्रजे ६२ वृत्तांतः
स्यात्प्रकरणे प्रकारे कार्त्स्न्यवार्त्तयोः आनर्त्तः समरे नृत्यस्थाने नीवृद्विशेषयोः ६३ कृतांतो यमसिद्धां २६

त देवाकुशलं कर्मस्यु श्लेष्मादिरसरक्तादिमहाभूतानि तद्गुणाः ६४ इन्द्रियाण्यश्मविकृतिः शब्दयोनि
श्च धातवः कक्षांतरेपि शुद्धांतो नृपस्यासर्वगोचरे ६५ कासूसामर्थ्ययोः शक्तिर्मूर्त्तिः काठिन्यकाययोः
विस्तारवल्ल्योर्व्रततिर्वसती रात्रिवेश्मनोः ६६ क्षयार्चयोरपचितिः सातिर्द्दानावसानयोः अर्त्तिः पीडाध
नुष्कोट्योर्जातिः सामान्यजन्मनोः ६७ प्रचारस्पंदयो रीतिरीतिर्डिंवप्रवासयोः उदयेऽधिगमे प्राप्तिस्त्रे
ता त्वग्नित्रये युगे ६८ वीणाभेदेऽपि महती भूतिर्भस्मनि संपदि नदीनगर्योर्नागानां भोगवत्यथ संग
रे ६९ संगे सभायां समितिः क्षयवासावपि क्षितौ रवेरर्चिश्च शस्त्रं च वह्निज्वाला च हेतयः ७० जगती जगति
च्छंदो विशेषेऽपि क्षितावपि पंक्तिश्छंदोऽपि दशमं स्यात्प्रभावेऽपि चायतिः ७१ पत्तिर्गतौ च मूले तु पक्षतिः पक्ष

अमर भेदयोः प्रकृतिर्योनिलिंगेच कैशिक्याद्याश्चवृत्तयः ७२ सिकताः स्युर्वालुकापि वेदेप्यवसितश्रुतिः वनिता १४
जनितात्यर्थानुरागायांचयोषिति ७३ गुप्तिः क्षितिव्युदासेपि धृतिर्धारणधैर्ययोः बृहती क्षुद्रवार्त्ताकी छंदो
७ भेदमहत्यपि ७४ वासितास्त्रीकरिण्योश्च वार्त्ता वृत्तौजनश्रुतौ वार्त्तं फल्गुन्यरोगेच त्रिष्वप्सुच घृतामृते
७५ कलधौतंरूप्यहेम्नोर्निमित्तंहेतुलक्ष्मणोः श्रुतंशास्त्रावधृतयोः युगपर्याप्तयोः कृतं ७६ अत्याहितं
महाभीतिः कर्मजीवानपेक्षिच युक्तेक्ष्मादावृतेभूतंप्राण्यतीतेसमेत्रिषु ७७ वृत्तंपद्येचरित्रेत्रिष्वतीतेदृढ
निस्तले महद्राज्यंचावगीतंजन्येस्याद्गर्हितेत्रिषु ७८ श्वेतंरूप्येपिरजतंहेम्निरूप्येसितेत्रिषु त्रिष्वितो
जगदिंगेपिरक्तंनील्यादिरागिच ७९ अवदातः सितेपीतेशुद्धेबद्धार्जुनौसितौ युक्तेतिसंस्कृतेमर्षिण्य ७

भिनीतोऽथसंस्कृतं ८० कृत्रिमेलक्षणोपेतेऽप्यनंतोनवधावपि ख्यातेहृष्टेप्रतीतोऽभिजातस्तुकुलजेबुधे
८१ विविक्तौपूतविजनौमूर्छितौमूर्छितौमूढसोच्छ्रयौ द्वौचाम्लपरुषौशुक्लौशितिर्धवलमेचकौ ८२ स
त्येसाधौविद्यमानेप्रशस्तेऽभ्यर्हितेचसत् पुरस्कृतःपूजितेऽरात्यभियुक्तेऽग्रतःकृते ८३ निवातावाश्र
यावातौशस्त्राभेद्यंचवर्मयत् जातोन्नद्धप्रवृद्धाःस्युरुच्छ्रिताउत्थितास्त्वमी ८४ वृद्धिमत्प्रोद्यतोत्पन्ना
आदृतौसादरार्चितौ इतितांताः अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु ८५ निपानागमयोस्तीर्थमृ
षिजुष्टजलेगुरौ समर्थस्त्रिषुशक्तिस्थेसंबद्धार्थेहितेपिच ८६ दशमीस्थौक्षीणरागवृद्धौवीथीपदव्य
पि आस्थानीयत्नयोरास्थाप्रस्थोऽस्त्रीसानुमानयोः ८७ शास्त्रद्रविणयोर्ग्रंथःसंस्थाधारेस्थितौमृतौ

अमर इतिथांताः अभिप्रायवशौछंदावब्दौजीमूतवत्सरौ अपवादेतुनिंदाज्ञेदायादौसुतबांधवौ ८८ पादारश्म्यंघ्रितु एम
र्यांशाश्चंद्राग्न्यर्कास्तमोनुदः निर्वादोजनवादेपिशादोजंबालशष्पयोः ८९ आरावेरुदितेत्रातर्याक्रंदोदा
८८ रुणोरणे स्यात्प्रसादोऽनुरागेपिसूदःस्याद्व्यंजनेपिच ९० गोष्ठाध्यक्षेपिगोविंदोहर्षेप्यामोदवन्मदः ।
प्राधान्येराजलिंगेचवृषांगेककुदोऽस्त्रियाम् ९१ स्त्रीसंविज्ज्ञानसंभाषाक्रियाकाराजिनामसु धर्मेरह
स्युपनिषत्स्यादृतौवत्सरेशरत् ९२ पदंव्यवसितित्राणस्थानलक्ष्मांघ्रिवस्तुषु गोष्पदंशोभितेमानेप्रति
ष्ठाकृत्यमास्पदं ९३ त्रिष्विष्टमधुरौस्वादूमृदूचातीक्ष्णकोमलौ मूढाल्पापटुनिर्भाग्यामंदास्युर्द्वौतुशारदौ
९४ प्रत्यग्राप्रतिभौविद्वत्सुप्रगल्भौविशारदौ इतिदांताः व्यामोवटश्चन्यग्रोधावुत्सेधःकायउन्नतिः ९५ पर्या ८८

हारश्च मार्गश्च विवधौ वीवधौ च तौ परिधिर्यज्ञियतरोः शाखायामुपसूर्य्यके ९६ बंधकं व्यसनं चेतःपीडाधि
ष्ठानमाधयः स्युः समर्थननीवाक्यनियमाश्च समाधयः ९७ दोषोत्पादेनुबंधः स्यात्प्रकृत्यादिविनश्वरे मुख्या
नुयायिनि शिशौ प्रकृतस्यानुवर्तने ९८ विधुर्विष्णौ चंद्रमसि परिच्छेदे बिलेऽवधिः विधिर्विधाने दैवेपि प्रणि
धिः प्रार्थने चरे ९९ बुधवृद्धौ पंडितेपि स्कंधः समुदयेपि च देशे नदविशेषेब्धौ सिंधुर्ना सरिति स्त्रियाम् १०० ।
विधा विधौ प्रकारे च साधू रम्येपि च त्रिषु वधूर्जाया स्नुषा स्त्री च सुधा लेपोमृतं स्नुही १०१ संधा प्रतिज्ञा मर्यादा श्र
द्धा संप्रत्ययः स्पृहा मधु मद्ये पुष्परसे क्षौद्रेप्यंधं तमस्यपि १०२ अतस्त्रिषु समुन्नद्धौ पंडितंमन्यगर्वितौ ब्रह्मबंधुर
धिक्षेपे निर्देशेथावलंबितः १०३ अविदूरोप्यवष्टब्धः प्रसिद्धौ ख्यातभूषितौ इति धांताः सूर्यवह्नी चित्रभानू

अमर भानूरश्मिदिवाकरौ १०४ भूतात्मानौधातृदेहौ मूर्खनीचौपृथक्जनौ ग्रावाणौशैलपाषाणौपत्रिणौ रम
शरपक्षिणौ १०५ तरुशैलौशिखरिणौशिखिनौवह्निबर्हिणौ प्रतियत्नावुभौलिप्सोपग्रहावथसादि
८८ नौ १०६ द्वौसारथिहयारोहौवाजिनोश्वेषुपक्षिणः कुलेप्यभिजनोजन्मभूम्यामप्यथहायनाः १०७ वर्षा
र्चिव्रीहिभेदाश्चचंद्राग्न्यर्कविरोचनाः क्लेशेपिवृजिनोविश्वकर्मार्कसुरशिल्पिनोः १०८ आत्मायत्नोधृति
बुद्धिःस्वभावोब्रह्मवर्ष्मच शक्रोघातुकमत्तेभोवर्षुकाब्दोघनाघनः १०९ घनोमेघेमूर्तिगुणेत्रिषुमूर्ते
निरंतरे अभिमानोऽर्थादिदर्पज्ञानेप्रणयहिंसयोः ११० इनःसूर्येप्रभौराजामृगांकेक्षत्रियेनृपे वाणि
न्यौनर्तकीदूत्यौस्रवंत्यामपिवाहिनी १११ ह्लादिन्यौवज्रतडितौवंद्यायामपिकामिनी त्वग्देहयोरपितनुःसूना ८८

धोजिह्मिकापि च ११२ ऋतुर्विस्तारयोरस्त्री वितानं त्रिषु तुच्छके मंदेथ केतनं कृत्ये केतावुपनिमंत्रणे ११३ ।
वेदस्तत्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः उत्साहने च हिंसायां सूचने चापि गंधनम् ११४ आतंचनं प्रतीवा
पजवनाप्यायनार्थकं व्यंजनं लांछनं श्मश्रुनिष्ठानावयवेष्वपि ११५ स्यात्कौलीनं लोकवादे युद्धे पश्वहिप
क्षिणां स्यादुद्यानं निःसरणे वनभेदे प्रयोजने ११६ अवकाशे स्थितौ स्थानं क्रीडादावपि देवनं उत्थानं पौ
रुषे तंत्रे सन्निविष्टोद्गमेपि च ११७ व्युत्थानं प्रतिरोधे च विरोधाचरणेपि च मारणे मृतसंस्कारे गतौ द्रव्येऽर्थदा
पने ११८ निर्वर्तनोपकरणानुव्रज्यासु च साधनं निर्यातनं वैरशुद्धौ दाने न्यासार्पणेपि च ११९ व्यसनं विपदि नै
भ्रंशे दोषे कामजकोपजे पक्ष्माक्षिलोम्नि किंजल्के तंत्वाद्यंशेप्यणीयसि १२० तिथिभेदे क्षणे पर्व वर्त्म नेत्र

अमर० च्छदेध्वानि अकार्य्यगुह्येकौपीनेमैथुनेसंगतेरतो १२१ प्रधानंपरमात्माधीःप्रज्ञानंबुद्धिचिन्हयोः प्रसूनं रम
पुष्पफलयोर्निधनंकुलनाशयोः १२२ क्रंदनेरोदनाह्वानेवर्ष्मदेहप्रमाणयोः गृहदेहत्विट्प्रभावाधामान्यथ
४० चतुष्पथे १२३ सन्निवेशेचसंस्थानंलक्ष्मचिन्हप्रधानयोः आच्छादनेसंपिधानमपवारणमित्युभे १२४
आराधनंसाधनेस्यादवाप्तौतोषणेपिच अधिष्ठानंचक्रपुरप्रभावाध्यासनेष्वपि १२५ रत्नंस्वजातिश्रे
ष्ठेपिवनेसलिलकानने तलिनंविरलेस्तोकेवाच्यलिंगंतथोत्तरे १२६ समानाःसत्समैकेस्युःपिशुनौख
लसूचकौ हीनन्यूनावूनगर्ह्यौवेगिशूरौतरस्विनौ १२७ अभिपन्नोपराद्धोभिग्रस्तव्यापद्गतावपि इति
नांताः कलापोभूषणेबर्हेतूणीरेसंहतावपि १२८ परिच्छदेपरीवापःपर्युप्तौसलिलस्थितौ गोधुग्गोष्ठपती ४०

गोपौ हरविष्णू वृषाकपी १२९ बाष्पमूष्माप्यश्रु कशिपुत्वन्नमाछादनंद्वयं तल्पंशय्याट्टदारेषुस्तंबेपि
विटपोस्त्रियां १३० प्राप्तरूपस्वरूपाभिरूपाबुधमनोज्ञयोः भेद्यलिंगाअमीकूर्मौवीणाभेदश्चक
च्छपी १३१ कुतपोमृगरोमोत्थपटेचान्होष्टमेंशके ॥ इतिपांताः ॥ रवर्णेपुंसिरेफःस्यात्कुत्सितेवा
च्यलिंगकः इतिफांताः अन्तराभवसत्वेश्वेगंधर्वोदिव्यगायने १३२ कंबुर्नावलयेशंखेद्विजिव्हौस
र्पसूचकौ पूर्वोन्यलिंगःप्रागाहपुंबहुत्वेपिपूर्वजान् १३३ इतिबांताः कुंभौघटेभमूर्द्धांशौडिंभौतुशि
शुबालिशौ स्तंभौस्थूणाजडीभावौशंभूब्रह्मत्रिलोचनौ १३४ कुक्षिभ्रूणार्भकागर्भाविस्रंभःप्रणयेपिच
स्याद्भेरीदुंदुभिःपुंसिस्यादक्षेदुंदुभिःस्त्रियां १३५ स्यान्महारजनेक्लीबंकुसुंभंकरकेपुमान् क्षत्रियेपिच

अमर० नाभिर्नौसुरभिर्गविचस्त्रियां १३६ सभासंसदिसभ्येचत्रिष्वध्यक्षेपिवल्लभः इतिभांताः किरणप्रग्रहौर रम
श्मीकपिभेकौप्लवंगमौ १३७ इच्छामनोभवौकामौशौर्योद्योगौपराक्रमौ धर्माःपुण्ययमन्यायस्वभा
६१ वाचारसोमपाः १३८ उपायपूर्वआरंभउपधाचाप्युपक्रमः वणिक्पथःपुरंवेदोनिगमोनागरोवणि
क् १३९ नैगमौद्वौबलेरामोनीलेचारुसितेत्रिषु शब्दादिपूर्वोवृंदेपिग्रामःक्रांतौचविक्रमः १४० स्तो
मःस्तोत्रेऽध्वरेवृंदेजिह्मस्तुकुटिलेऽलसे उष्मापिधर्मग्रीष्मालंकारेभ्रांतौचविभ्रमः १४१ गुल्मारुक्स्
तंबसेनाश्चजामिःस्वसृकुलस्त्रियोः क्षितिक्षांत्योःक्षमायुक्तेक्षमंशक्तेहितेत्रिषु ४२ त्रिषुश्यामौह
रित्कृष्णौश्यामास्याच्छारिवानिशा ललामंपुच्छपुंड्राश्वभूषाप्राधान्यकेतुषु १४३ सू [illegible] ध्याम ६१

मप्याद्येप्रधानेप्रथमस्त्रिषु वामौवल्गुप्रतीपौद्वावधमौन्यूनकुत्सितौ १५४ जीर्णंचपरिभुक्तंचयातयाममिदं
द्वयं इतिमान्ताः तुरंगगरुडौतार्क्ष्यौनिलयापचयौक्षयौ श्वशुर्यौदेवरश्यालौभ्रातृव्यौभ्रातृजद्विषौ १५५
पर्जन्यौरसदब्देन्द्रौस्यादर्यःस्वामिवैश्ययोः तिष्यःपुष्येकलियुगेपर्यायोवसरेक्रमे १५६ प्रत्ययोधीनशपथ
ज्ञानविश्वासहेतुषु रंध्रेशब्देथानुशयोदीर्घद्वेषानुतापयोः १५७ स्थूलोच्चयस्त्वसाकल्येनागानांमध्य
मेगते समयाःशपथाचारकालसिद्धांतसंविदः १५८ व्यसनान्यशुभंदैवंविपदित्यनयास्त्रयः अत्ययोऽति
क्रमेकृच्छ्रेदोषेदंडेप्यथापदि १५९ युद्धायत्योःसंपरायः पूज्यस्तुश्वशुरेपिच पश्चाद्दवस्थायिबलंसमवा
यश्चसन्नयौ १६० संघातेसन्निवेशेचसंस्त्यायःप्रणयास्त्वमी विस्रंभयाच्ञाप्रेमाणोविरोधेपिसमुच्छ्रयः ५

अमर विषयोयस्ययोज्ञातस्तत्रशब्दादिकेष्वपि निर्यासेपि कषायोस्त्री सभायांचप्रतिश्रयः ५२ प्रायोभूम्न्यंतगमने राम
मन्युर्दैन्येक्रतौक्रुधि रहस्योपस्थयोर्गुह्यंसत्यंशपथतथ्ययोः १५३ वीर्यंबलेप्रभावेचद्रव्यंभव्येगु
८२ णाश्रयेधिष्ण्यंस्यान्नेगृहेभेऽग्नौभाग्यंकर्मशुभाशुभं १५४ कशेरुहेम्नोर्गांगेयंविशल्यादंतिकापिच वृषाक
पायीश्रीगौर्योरभिख्यानामशोभयोः १५५ आरंभोनिष्कृतिःशिक्षापूजनंसंप्रधारणम् उपायःकर्मचेष्टाच
चिकित्साचनवक्रियाः १५६ छायासूर्यप्रियाकांतिःप्रतिबिंबमनातपः कक्ष्याप्रकोष्ठेहर्म्यादेःकांच्यांमध्ये
भबंधने १५७ कृत्याक्रियादेवतयोस्त्रिषुभेद्येधनादिभिः जन्यंस्याज्जनवादेपिजघन्योंतेऽधमेपिच १५८ गर्ह्याधी
नौचवक्तव्यौकल्यौसज्जनिरामयौ आत्मवाननपेतोऽर्थादर्थ्यौपुण्यंतुचार्वपि १५९ रूप्यंप्रशस्तरूपेपिव ८२

रान्ते वल्गु वागपि न्याय्येपि मध्यः सौम्यं तु सुंदरे सोमदैवते १६० यांताः निवहावसरौ वारौ संस्तरौ प्रस्तरा
ध्वरौ गुरू गीष्पतिपित्राद्यौ द्वापरौ युगसंशयौ १६१ प्रकारौ भेदसादृश्ये आकाराविंगिताकृती किंशारू
सस्यशूके पुंमरू धन्वधराधरौ १६२ अद्रयो द्रुमशैलार्काः स्त्रीस्तनाब्दौ पयोधरौ ध्वांतारिदानवा वृत्रा ब
लिहस्तांशवः कराः १६३ प्रदरा भंगनारीरुग्बाणा अस्राः कचा अपि अजातशृंगो गौः काले प्यश्मश्रुर्नरश्च
तूवरौ १६४ स्वर्णेपि राः परिकरः पर्यंकपरिवारयोः मुक्ताशुद्धौ च तारः स्याच्छारो वायौ स तु त्रिषु १६५ कर्बु
रेथ प्रतिज्ञाजिसंविदापत्सु संगरः वेदभेदे गुप्तवादे मंत्रो मित्रो रवावपि १६६ मखेषु यूपखंडेपि स्वरुर्गुह्ये
प्यवस्करः आडंबरस्तूर्यरवे गजेंद्राणां च गर्जिते १६७ अभिहारोभियोगे च चौर्ये संनहनेपि च स्याज्जंगमे प

अमर रोवारः खड्गकोशे परिच्छदे १६८ विष्टरो विटपी दर्भमुष्टिः पीठद्यमासनं द्वारि द्वास्थे प्रतीहारः प्रतीहार्य्य राम
प्यनंतरे १६९ विपुलौ नकुले विष्णौ बभ्रुर्नापिंगले त्रिषु सारो वले स्थिरांशे चन्याय्ये क्लीवं वरे त्रिषु १७० दु
८३ रोदरो द्यूतकारे पणे द्यूते दुरोदरं महारण्ये दुर्गपथे कांतारं पुन्नपुंसकं १७१ मत्सरोऽन्यशुभद्वेषे तद्वत्कृ
पणयोस्त्रिषु देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीवं मनाक्प्रिये १७२ वंशांकुरे करीरोस्त्री तरुभेदे घटे च ना नाचमूजघ
ने हस्तसूत्रे प्रतिसरोस्त्रियां १७३ यमानिलेंद्रार्कविष्णुसिंहांशुवाजिषु शुकाहिकपिभेकेषु हरिर्नाकपिले त्रिषु
१७४ शर्करा कर्परांशेपि यात्रा स्याद्यापने गतौ इराभूवाक्सुराप्सु स्यात्तंद्री निद्राप्रमीलयोः १७५ धात्री स्या
दुपमातापि क्षितिरप्यामलक्यपि क्षुद्राव्यंगानटी वेश्या सरघा कंटकारिका ७६ त्रिषु क्रूरेऽधमे ८३

ल्पेपिक्षुद्रंमात्रापरिछदे अल्पेचपरिमाणेसामात्रंकात्स्न्येऽवधारणे १७७ आलेख्याश्चर्ययोश्चित्रं
कलत्रंश्रोणिभार्ययोः योग्यभाजनयोःपात्रंपत्रंवाहनपक्षयोः १७८ निदेशग्रंथयोःशास्त्रंशस्त्रमायु
धलोहयोः स्याज्जटांशुकयोर्नेत्रंक्षेत्रंपत्नीशरीरयोः स्याज्जटांशुकयोर्नेत्रंक्षेत्रंपत्नीशरीरयोः १७९ मुखा
ग्रेक्रोडहलयोःपोत्रंगोत्रंतुनाम्निच सत्रमाछादनेयज्ञेसदादानेवनेऽपिच १८० अजिरंविषयेकाये
अंबरंव्योम्निवाससि चक्रंराष्ट्रेप्यक्षरंतुमोक्षेपिनीरमप्सुच १८१ स्वर्णेपिभूरिचंद्रौद्वौद्वारमात्रेपिगोपुरं गु
हादंभेगव्हरेह्वरहोंऽतिकमुपव्हरे १८२ पुरोधिकमुपर्यग्राण्यगारेनगरेपुरं मंदिरंचाथराष्ट्रोऽस्त्रीविषयेस्या
दुपद्रवे १८३ दरोऽस्त्रियांभयेश्वभ्रेवज्रोऽस्त्रीहीरकेपवौ तंत्रंप्रधानेसिद्धांतेसूत्रवायेपरिछदे १८४ ।

अमर औशीरश्चामरेदंडेप्यौशीरंशयनासने पुष्करंकरिहस्ताग्रेवाद्यभांडमुखेजले व्योम्निखड्ग राम
फलेपद्मेतीर्थौषधिविशेषयोः १८५ अंतरमवकाशावधिपरिधानांतर्द्धिभेदतादर्थ्ये छिद्रात्मीयविनाब
८४ हिरवसरमध्येंतरात्मनिच १८६ मुस्तेपिपिठरंराजकशेरुण्यपिनागरं शार्वरंत्वंधतमसेघातुकेभेघलिं
गकं १८७ गौरोरुणोसितेपीतेव्रणकार्य्यप्यरुष्करः जठरःकठिनेपिस्यादधस्तादपिचाधरः १८८ अना
कुलेपिचैकाग्र्योव्यासक्तव्याकुले उपर्युदीच्यश्रेष्ठेष्वप्युत्तरःस्यादनुत्तरः १८९ एषांविपर्ययेश्रेष्ठेदू
रानात्मोत्तमाःपराः स्वादुप्रियौतुमधुरौक्रूरौकठिननिर्दयौ १९० उदारोदातृमहतोरितरस्त्वन्यनीचयोः मं ८४
दस्वच्छंदयोःस्वैरःशुभ्रमुद्दीप्तशुक्लयोः १९१ इतिरांताः चूडाकिरीटंकेशाश्चसंयतामौलयस्त्रयः द्रुमप्रभेद

मातंगकांडपुष्पारिणि पीलवः १९२ कृतांतानेहसोः कालश्चतुर्थेपि युगे कलिः स्यात्कुरंगेपि कमलः प्रावारे
पि च कंबलः १९३ करोपहारयोः पुंसि बलिः प्राण्यंगजे स्त्रियाम् स्थौल्यसामर्थ्यसैन्येषु बलं ना काकसी
रिणोः १९४ वातूलः पुंसि वात्यायामपि वातासहे त्रिषु भेद्यलिंगः शठे व्यालः पुंसि श्वापदसर्पयोः १९५ मलो
स्त्री पापविट्किट्टान्यस्त्री शूलं रुगायुधं शंकावपि द्वयोः कीलः पालिः स्त्र्यश्र्यंकपंक्तिषु १९६ कला शिल्पे काल
भेदेप्याली सख्यावली अपि अब्ध्यंबुविकृतौ वेला कालमर्यादयोरपि १९७ बहुलाः कृत्तिका गावो बहुलो
ग्नौ शितौ त्रिषु लीलाविलासक्रिययोरुपला शर्करापि च १९८ शोणितेंभसि कीलालं मूलमाद्ये शिफाभयोः।
जालं समूह आनायगवाक्षक्षारकेष्वपि १९९ शीलं स्वभावे सद्वृत्ते सस्ये हेतुकृते फलं छर्दिर्नेत्ररुजोः स्त्री

अमर
८५

वंसमूहेप्यत्तलंनना २०० अधःस्वरूपयोरस्त्रीतलंस्याच्चामिषेपलं और्वानकेपितालेवलंवस्त्रेऽधमेत्रिषु
२०१ कुकूलंशंकुभिःकीर्णेश्वभ्रेनातुतुषानले निर्णीतेकेवलमितित्रिलिंगत्वेककृत्स्नयोः २०२ पर्या
प्तिक्षेमपुण्येषुकुशलंशिक्षितेत्रिषु प्रवालमंकुरेप्यस्त्रीत्रिषुस्थूलंजडेपिच २०३ करालोदंतुरेतु
गेचारौदक्षेचपेशलः मूर्खेर्भकेपिबालःस्याल्लोलश्चलसतृष्णयोः २०४ दवदावौवनारण्यवन्ही
जन्महरौभवौ मंत्रीसहायःसचिवौपतिशाखिनराधवाः २०५ अवयःशैलमेषार्काआज्ञाह्वानाध्वरा
हवाः भावःसत्तास्वभावाभिप्रायचेष्टात्मजन्मसु २०६ स्यादुत्पादेफलेपुष्पेप्रसवोगर्भमोचने अ
विश्वासेऽपन्हवेपिनिकृतावपिनिन्हवः २०७ उत्सेकामर्षयोरिच्छाप्रसरेमहउत्सवः अनुभावः

रम
८५

प्रभावेचसमर्तांचमतिर्निश्चये २०८ स्याज्जन्महेतुः प्रभवः स्थानंचाद्योपलब्धये शूद्रायांविप्रतनयेश
स्त्रेपारशवोमतः २०९ ध्रुवोभभेदेक्लीबंतुनिश्चितेशाश्वतेत्रिषु स्वोज्ञातावात्मनिस्वंत्रिष्वात्मीयेस्वो
ऽस्त्रियांधने २१० स्त्रीकटीवस्त्रबंधेपिनीवीपरिपणेपिच शिवागौरीफेरवयोर्द्वंद्वंकलहयुग्मयोः
२११ द्रव्यासुव्यवसायेषुसत्त्वमस्त्रीतुजंतुषु क्लीबंनपुंसकंषंढेवाच्यलिंगमविक्रमे २१२ इतिवांताः ॥
द्वौविशौवैश्यमनुजौ द्वौचराभिमरौस्पशौ द्वौराशीपंचमेषाद्यौ द्वौवंशौकुलमस्करौ २१३ रहः
प्रकाशौवीकाशौनिर्वेशोभृतिभोगयोः कृतांतेपुंसिकीनाशः क्षुद्रकर्षकयोस्त्रिषु २१४ पदेलक्ष्ये
निमित्तेऽपदेशःस्यात्कुशमप्सुच दशावस्थानेकविधाप्याशातृष्णापिचायता २१५ वशास्त्रीकरिणी

अमर चस्यात्दृग्ज्ञानेज्ञातरिति त्रिषु स्यात्कर्कशः साहसिकः कठोरामसृणावपि २१६ प्रकाश्योतिप्रसिद्धेपि राम
शिशावज्ञेचवालिशः कोशोस्त्रीकुड्मलेखड्गपिधानेर्थौघदिव्ययोः २१७ इतिशांताः सुरमत्स्याव
९६ निमिषौपुरुषावात्ममानवौ काकमत्स्यात्खगौध्वांक्षौ कक्षौतुतृणवीरुधौ २१८ अभीषुः प्रग्रहेरश्मौ
प्रैषः प्रेषणमर्दने पक्षः सहायेप्युष्णीषः शिरोवेष्टकिरीटयोः २१९ शुक्लेमूषिकश्रेष्ठेसुकृतेवृष
भेवृषः द्यूतेक्षेशारिफलकेप्याकर्षोथाक्षमिंद्रिये २२० नाद्यूतांगेकर्षचक्रेव्यवहारेकलिद्रुमे कर्षूर्वा
र्त्तौकरीषाग्निः कर्षूः कुल्याभिधायिनी २२१ पुंभावेतत्क्रियायांच पौरुषंविषमप्स्वच उपादानेप्या
मिषंस्यादपराधेपिकिल्बिषं २२२ स्याद्वृष्टौलोकधात्वंशेवत्सरेवर्षमस्त्रियां प्रेक्षानृत्येक्षणंप्रज्ञाभित्तासे ९६

वार्थनाभिमतः २२३ त्विड्द्दशोभापि त्रिषु परेन्यक्षं कार्त्स्न्ये निकृष्टयोः प्रत्यक्षेऽकृतेऽध्यक्षो रूक्षस्त्वप्रेम्ण्यप
चिक्कणे २४ इति षान्ताः रविश्वेतच्छदौ हंसौ सूर्य्ये वन्हौ विभावसुः वत्सौ तर्णकवर्षौ द्वौ सारंगाश्च दिवौ
कसः २५ शृंगारादौ विषे वीर्य्ये गुणे रागे द्रवे रसः पुंस्युत्तंसावतंसौ द्वौ कर्णपूरे च शेखरे २२६ देवभेदेनले
रश्मौ वसू रत्ने धने वसु विष्णौ च वेधाः स्त्री त्वाशीर्हिताशंसाहिदंष्ट्रयोः २२७ लालसे प्रार्थनौत्सुक्ये हिं
सा चौर्यादिकर्म च प्रसूरश्वापि भूद्यावौ रोदस्यौ रोदसी च ते २२८ ज्वालाभासोर्नपुंस्यर्चिर्ज्योतिर्भद्योतदृष्टि
षु पापापराधयोरागः खगबाल्यादिनोर्वयः २२९ तेजःपुरीषयोर्वर्चो महस्तूत्सवतेजसोः रजो गुणे च
स्त्रीपुष्पे राहौ ध्वान्ते गुणे तमः २३० छन्दः पद्येऽभिलाषे च तपः कृच्छ्रादिकर्म च सहो बलं सहा मार्गो नभः खं श्रा

दे५

वर्गोनभाः २३१ (श्लोकः सम्राश्रयश्लोकाः पयः क्षीरं पयोंबु च ओजो दीप्तौ बले स्रोत इंद्रिये निम्नगा
रये) २३२ श्लोकः सम्राश्रयश्लोकाः पयः क्षीरं पयोंबु च ओजो दीप्तौ बले स्रोत इंद्रिये निम्नगारये ॥
२३२ तेजः प्रभावे दीप्तौ च बले शुक्रेप्यतस्त्रिषु विद्वान् विदंश्च बीभत्सो हिंस्रोप्यतिशये त्वमी २३३ वृद्धप्रश
स्ययोर्ज्यायान् कनीयांस्तु युवाल्पयोः वरीयांस्तूरुवरयोः साधीयान् साधुवाढयोः २३४ इति सांताः ॥
दलेपि वर्हं निर्वंधोपरागार्काद्यो ग्रहाः द्वार्यापीडे क्वाथरसे निर्यूहो नागदंतके २३५ तुलासूत्रेश्वादि
रश्मौ प्रग्राहः प्रग्रहोपि च पत्नीपरिजनादानमूलशापाः परिग्रहाः २३६ दारेषु च गृहाः श्रोण्यामप्या
रोहो वरस्त्रियाः व्यूहो वृंदेप्यहिर्वृत्रेप्यग्न्यर्केंदवस्तमोपहाः २३७ परिच्छदे नृपार्हेर्थे परिवर्हो ॥ इति

५

हांताः ॥ व्ययाः परे ॥ आङीषदर्थेऽभिव्याप्तौ सीमार्थे धातुयोगजे २३८ आप्रगृह्यः स्मृतौ वाक्येऽप्यास्तुस्या
त्कोपपीडयोः २३९ चान्वाचयसमाहारेतरेतरसमुच्चये स्वस्त्याशीः क्षेमपुण्यादौ प्रकर्षे लंघनेप्यति २४०
स्वित्प्रश्ने च वितर्के च तु स्याद्भेदेऽवधारणे सकृत्सहैकवारे चाप्याराद्दूरसमीपयोः २४१ प्रतीच्यां चरमे पश्चा
दुताप्यर्थविकल्पयोः पुनःसहार्थयोः शश्वत्साक्षात्प्रत्यक्षतुल्ययोः २४२ खेदानुकंपासंतोषविस्मयामंत्रणे
वत हंत हर्षेनुकंपायां वाक्यारंभविषादयोः २४३ प्रति प्रतिनिधौ वीप्सालक्षणादौ प्रयोगतः इतिहेतुप्रक
रणप्रकाशादिसमाप्तिषु २४४ प्राच्यां पुरस्तात्प्रथमे पुरार्थेऽग्रत इत्यपि यावत्तावच्च साकल्येऽवधौ मानेऽवधा
रणे २४५ मंगलानंतरारंभप्रश्नकार्त्स्न्येष्वथो अथ वृथा निरर्थकाविध्योर्नानाऽनेकोभयार्थयोः २४६ ॥

अमर० नुपृच्छायांविकल्पेचपश्चात्सादृश्ययोरनु प्रश्नावधारणानुज्ञानुनयामंत्रणेननु २४७ गर्हासमुच्चयप्रश्नशं राम
कासंभावनास्वपि उपमायांविकल्पेवासामित्वर्द्धेजुगुप्सिते २४८ अमासहसमीपेचकंवारिणिचमूर्द्ध
७ नि इवेत्थमर्थयोरेवंनूनंतर्केर्थनिश्चये २४९ तूष्णीमर्थेसुखेजोषंकिंपृच्छायांजुगुप्सने नामप्राका
९८ श्यसंभाव्यक्रोधोपगमकुत्सने २५० अलंभूषणपर्याप्तिशक्तिवारणवाचकं हुंवितर्केपरिप्रश्नेसमयांतिक
ध्योः २५१ पुनरप्रथमभेदेनिर्निश्चयनिषेधयोः स्यात्प्रबंधेचिरातीतेनिकटागामिकेपुरा २५२ उररीउरी
चोररीचविस्तारेंगीकृतेत्रयं स्वर्गेपरेचलोकेस्वर्वार्त्तासंभाव्ययोःकिल २५३ निषेधवाक्यालंकार
जिज्ञासानुनयेखलु समीपोभयतःशीघ्रसाकल्याभिमुखेभितः २५४ नामप्रकाश्ययोःप्रादुर्मिथोन्यो ९८

न्यंरहस्यपि तिरोंतर्धौतिर्य्यगर्थेहानिषादमुगर्जिषु २५५ अहहेत्यद्भुतेखेदेहिंहेतावधारणे ॥
ं॥इतिनानार्थवर्गः चिरायचिररात्रायचिरस्याद्याश्चिरार्थकाः मुहुःपुनःपुनःशश्वदभीक्ष्णमस
कृत्समाः १ स्राक्झटित्यंजसाह्नायद्राङ्मंक्षुसपदिद्रुते बलवत्सुष्ठुकिमुतस्वत्यतीवचनिर्भरे २ पृथग्
विनांतरेणर्तेहिरुङ्नानाचवर्जने यद्यत्तत्तोहेत्वावसाकल्येतुचिच्चन ३ कदाचिज्जातुसार्धंतु
साकंसत्रासमंसह आनुकूल्यार्थकंप्राध्वंव्यर्थकेतुवृथामुधा ४ आहोउताहोकिमुतविकल्पेकिंकिमुत
च तुहिचस्महवैपादपूरणेपूजनेस्वति ५ दिवाह्नीत्यथदोषाचनक्तंचरजनाविति तिर्यगर्थेसाचि
तिरोप्यथसंबोधनार्थकाः ६ स्युःप्याट्पाडंगहेहैभोः समयानिकषाहिरुक् अतर्कितेतुसहसास्यात्पुरः

अमर पुरतोऽग्रतः ७ स्वाहा देवहविर्दाने श्रौषट् वौषट् वषट् स्वधा किंचिदीषन्मनागल्पे प्रेत्यामुत्र भवांतरे रम
८ वद्वा यथा तथैवैवं साम्येऽहो ही च विस्मये मौने तु तूष्णीं तूष्णीकं सद्यः सपदि तत्क्षणे ९ दिष्ट्या समुप
९९ जोषं चेत्यानंदेऽथांतरेंतरा अंतरेण च मध्ये स्युः प्रसह्य तु हठार्थकं १० युक्ते द्वे सांप्रतं स्थानेऽभीक्ष्णं श
श्वदनारते अभावे नह्यनो नापि मास्म मालं च वारणे ११ पक्षांतरे चेद्यदि च तत्त्वे त्वद्धांजसा द्वयम् ।
प्राकाश्ये प्रादुराविः स्यादोमेवं परमं मते १२ समंततस्तु परितः सर्वतो विष्वगित्यपि अकामानुम
तौ काममसूयोपगमेऽस्तु च १३ ननु च स्याद्विरोधोक्तौ कच्चित्कामप्रवेदने निःषमं दुःषमं गर्ह्ये यथास्वं तु ९९
यथायथं १४ मृषा मिथ्या च वितथे यथार्थं तु यथातथं स्युरेवं तु पुनर्वै वेत्यवधारणवाचकाः १५ प्राग

तोतार्थेकंनूनमवश्यंनिश्चयेद्वयं संवद्वर्षेऽवरेत्वर्वागामेवंस्वयमात्मना १६ अल्पेनीचैर्महत्युच्चैः
प्रायोभूम्न्यद्रुतेशनैः सनानित्येवहिर्वाह्येस्मातीतेस्तमदर्शने १७ अस्तिसत्वेरुषोक्तावुऊंप्रश्नेऽनु
नयेत्वयि हुंतर्केस्यादुषारात्रेरवसानेनमोनतौ १८ पुनरर्थेंगनिंदायांदुष्ठुसुष्ठुप्रशंसने सायंसायेप्र
गेप्रातःप्रभातेनिकषांतिके १९ परुत्परार्यैषमोब्देपूर्वेपूर्वतरेयति अद्यात्राह्न्यथपूर्वेह्नीत्यादौपूर्वोत्त
रापरात् २० तथाधरान्यान्यतरेतरात्पूर्वेद्युरादयः उभयद्युश्चोभयेद्युः परेत्वह्निपरेद्यवि २१ ह्योग
तेऽनागतेह्निश्वः परश्वस्तुपरेहनि तदातदानींयुगपदेकदासर्वदासदा २२ एतर्हिसंप्रतीदानीम
धुनासांप्रतंतथा दिग्देशकालेपूर्वादौप्रागुदक्प्रत्यगादयः २३ इत्यव्ययवर्गः ॥ ॥ ॥

अमर सलिंगशास्त्रैः सन्नादिकृत्तद्धितसमासजैः अनुक्तैः संग्रहे लिंगसंकीर्णवदिहान्वयेत् १ लिंगशेषवि एमु
धिर्व्यापी विशेषैर्यद्यबाधितः स्त्रियामीदूद्विरामैकाच्सयोनिप्राणिनाम च २ नामविद्युन्निशावल्ली
९९ वीणादिग्भूनदीह्रियां अदंतैर्द्विगुरेकार्थो न स पात्रयुगादिभिः ३ तल्वृंदे येनिकट्यत्रा वैरमैथुनिका
१०० दिवुन् स्त्रीभावादावनिक्तिण्ण्वुल्णच् ण्वुच् क्यप् युजिङ्निशाः ४ उणादिषु निरूढीष्व्याबूङंतं चलं
स्थिरं तद्धीडायां प्रहरणे चेन्मौष्टापाल्लवाणादिक ५ घञबोयः साक्रियास्यांचेद्दंडपातोहिफाल्गु
नी श्येनंपाताचमृगया तैलंपातास्वधेति दिक् ६ स्त्रीस्यात्काचिन्मृणाल्यादिर्विवक्षाऽपचये यदि लंकाशे
फालिकाटीकाधातकीपंजिकाटकी ७ सिघुकासारिकाहिक्काप्राचिकोल्कापिपीलिका तिंदुकीकणि ८१००

काभंगिःसुरंगासूचिमाटयः ८ पिछावितंडाकाकिरणपश्चूर्णिःशारणीदुरणोदरत् सातिःकंथातथाःसं
दीनाभीराजसभापिच ९ झल्लरीचर्चरीपारीहोरलुट्याचसिध्मला लाटाभिदाचगंडूषागृध्रसी
चमसीमसी १० इतिस्त्रीलिंगसंग्रहः पुंस्त्वंसभेदानुचराःसपर्यायाःसुरासुराः स्वर्गयागाद्रिमेघाब्धिद्रुकु
लासिशरारयः ११ करगंडोष्ठदोर्दंतकंठकेशनखस्तनाः अन्हाहांताःक्ष्वेडभेदारात्रांताःप्रागसंख्यकाः
१२ मीवेष्टाप्याम्ब्लनिर्यासाःसकंताःसवाधिताः कशेरुजतुवस्तूनिहित्वातुरुविरामकाः १३ कषणभम
मरोभांतायघदंताअमीअथ पथनयसटोपांतागोत्राख्याश्चरणाव्हयाः १४ नाम्न्यकर्त्तरिभावेचघञज
ब्नङणघाधुचः ल्युःकर्त्तरीमनिच्भावेकोघोःकिःप्रादितोऽन्यतः १५ द्वंद्वेश्ववडवावश्ववडवानसमा

अमर हृते कांतःसूर्येंदुपर्यायपूर्वोयःपूर्वकोपिच १६ वटकश्चानुवाकश्चरल्लकश्चकुडंगकः पुंखोऽस्त्रीखःसमुद्ग रम
श्चविटपदृघटाःखटाः १७ कोट्टारघट्टहट्टाश्चपिंडगोंडपिचंडवत् गडुःकरंडोलगुडोवरंडश्चकिणोघु
१०१ णाः १८ दृतिसीमंतहरितोरोमंथोद्गीथबुद्बुदः कासमर्दोर्बुदःकुंदःफेनस्तूपौसयूपकौ १९ आत
पःक्षत्रियेनाभिःकुणपक्षुरकेदराः पूरक्षुरप्रचुकाश्चगोलहिंगुलपुद्गलाः २० वेतालभल्ल
मल्लाश्चपुरोडाशोपिपट्टिशः कुल्माषोरभसश्चैवसकटाहःपतद्ग्रहः २१ इतिपुल्लिंगशेषः द्विहीने
ऽन्यच्चखारण्यपर्णश्वभ्रहिमोदकं शीतोष्णमांसरुधिरमुखाक्षिद्रविणंबलं २२ फलहेम १०१
शुल्वलोहसुखदुःखशुभाशुभम जलपुष्पाणिलवणंव्यंजनान्यनुलेपनं २३ कोट्याःशतादि

संख्याम्यावालक्षानियुतंचतत् घञक्रमसिसुसंनंतेयस्त्रीतमकर्त्तरि २४ त्रांतंसल्लोपधंशिंच्छंरात्रंप्राक्
संख्ययान्वितं पात्राद्यदंतैरेकार्थोद्विगुर्लक्ष्यानुसारतः २५ द्वंद्वैकत्वाव्ययीभावौपथः संख्याव्य
यात्परः षष्ठ्याश्छायाबहूनांचेद्विछायसंहतौसभा २६ शालार्थापिपराराजामनुष्यार्थादराज
कात् दासीसभंनृपसभंरक्षःसभमिमादिशः २७ उपज्ञोपक्रमांतश्चतदादित्वप्रकाशने कोप
ज्ञकोपक्रमादिकंथोशीनरनामसु २८ भावेनणकचिद्भ्योन्येसमूहेभावकर्मणोः अदंतप्रत्ययाः
पुण्यसुदिनाभ्यांत्वहःपरः २९ क्रियाव्ययानांभेदकान्येकत्वेप्युक्थ्यतोटके चोचंपिच्छंगृहस्थूणं
तिरीटकर्मयोजनं ३० राजसूयंवाजपेयंगद्यपद्येकृतौकवेः माणिक्यभाष्यसिंदूरचीरचीवरपिंज

रं ३१ लोकायतं हरितालं विदलस्याल्लवालिहं ॥ ॥इतिनपुंसकसंग्रहः पुंनपुंसकयोः शे
षोर्धर्चपिण्याककंटकाः ३२ मोदकस्तंडकष्टंकः शाटकः कर्पटोऽर्बुदः पातकोद्योगचरकतमालामल
कानदुः ३३ कुहुंमुंडशीधुबुस्तं क्ष्वेडितं क्षेमकुट्टिमं संगमंशतमानार्मशंबलाव्ययतांडवम् ३४ ॥
कविषंकंदकर्पासंपारावारंयुगंधरं यूपंप्रग्रीवपात्रीवेयूषंचमशचिक्कसौ ३५ अर्द्धर्चादौघृतादी
नां पुंस्त्वाद्यं वैदिकं ध्रुवं तन्नोक्तमिहलोकेपि तच्चेदस्त्यस्तुशेषवत् ३६ इतिपुंनपुंसकसंग्रहवर्गः ॥
स्त्रीपुंसयोरपत्यांताः द्विचतुःषट्पदोरगाः जातिभेदाः पुमाख्याश्चस्त्रीयोगेः सहमल्लकः ३७ ऊर्मिव
राटकः स्वातिर्वराटको [illegible] स्फाटलिर्मनुः मूषासृपाटीकर्कंधूर्यष्टिः शाटीकटीकुटी ३८ इतिस्त्रीपुं १०२

नशेषसंग्रहवर्गः स्त्रीनपुंसकयोर्भावक्रिययोः ष्यञ्क्वचिच्चवुञ् औचित्यमौचितीमैत्रीमैत्र्यंवु
ञ्प्रागुदाहृतं ३९ षष्ठ्यंतप्राक्पदाः सेनाछायाशालासुरानिशा स्याद्वानृसेनंश्वनिशंगोशाल
मितरेचदिक् ४० आवन्नंतोत्तरपदोद्विगुश्चापुंसिनश्चलुप् त्रिखट्वंचत्रिखट्वीचत्रितक्षंचत्रितक्ष्य
ति ४१ त्रिगुपात्रीपुरीवाटीपेटीकुवलदाडिमौ इतित्रिलिंगशेषसंग्रहवर्गः परलिंगंस्वप्रधान्ये
द्वंद्वेतत्पुरुषेपितत् ४२ अर्थांताः प्राघलंप्राप्तापन्नपूर्वाः परोपगाः तद्धितार्थोद्विगुः संख्यास
र्वनामतदंतकाः ४३ बहुव्रीहिरदिङ्नाम्नामुन्नेयंतदुदाहृतं गुणद्रव्यक्रियायोगोपाधिभिः पर
गामिनः ४४ कृतः कर्त्तर्यसंज्ञायांकृत्याः कर्त्तरिकर्मणि अनाद्यंतास्तेनरक्षाद्यर्थेनानार्थभेदकाः ४५

॥अमर कोश॥

अमरकोशः

अमर० राम

१०३

१०३ षट संज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययं परं विरोधे शेषं तु ज्ञेयं शिष्टप्रयोगतः ४६ इति १०३
१०३ लिंगादिसंग्रहवर्गः इत्यमरसिंहकृतौ नामलिंगानुशासने सामान्यकाण्डस्तृतीयः सां १०३
१०३ गएव समर्थितः ४७ इत्यमरकोशे तृतीयकाण्डः समाप्तः शुभं भूयात् आश्विनकृष्ण १० सं० १८१२ १०३

१०३

95/26(D)